दिनाङ्कः - 04/12/2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचिका कामना झा

मुख्यवार्ताः

- भाजपायाः वरिष्ठो नेता देवेन्द्र-फडणवीसः महाराष्ट्रराज्यस्य अग्रिमः मुख्यमन्त्रीरूपेण श्वः मुम्बईनगरस्य आजाद उद्याने शपथ वचनं गृह्णीयात्।
- भारतेन विकासशीलराष्ट्रानाम् उत्तम सहयोगार्थं वैश्विकवित्तीयव्यवस्थायां परिवर्तनस्य आह्वानं कृतम्।
- अमृतसरे स्वर्णमन्दिरस्य प्रवेशद्वारे पञ्जाबराज्यस्य पूर्वउपमुख्यमंत्रीणः सुखबीरसिंह बादलस्योपरि हत्यायाः प्रयासः अद्य अभवत्, यस्मिन् सः अक्षतः एव अस्ति ।
- अद्य अण्डर-१९ इत्येतस्यां एशिया चषक-क्रीडायां भारतेन शारजाह-क्रिकेट्-क्रीडाङ्गणे संयुक्त-अरब-अमीरातस्य अ-समूहस्य एकदिवसीय-अंताराष्ट्रीय-क्रिकेट्-क्रीडायां दश स्तोभैः पराजितम्।
- हॉकीति-क्रीडायां अद्य सायं ओमान-देशस्य मस्कट्-नगरे पुरुषाणां-कनिष्ठ-हॉकी-एशिया-चषक-क्रीडायाः अन्तिम-क्रीडायां भारतीय-दलं पाकिस्तान दलं सम्मुखी करिष्यति।

---------------------------------------

मुख्यमन्त्री-देवेन्द्र फडणवीसः-

भाजपायाः वरिष्ठो नेता देवेन्द्र-फडणवीसः महाराष्ट्रराज्यस्य अग्रिमः मुख्यमन्त्री भविष्यति। सः श्वः तृतीयवारं महायुतिसंयुतेः मुख्यमन्त्रीरूपेण शपथ वचनं गृह्णीयात्, मुम्बईनगरे आयोजितेस्मिन् कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी इत्यादयः महासंयुतेः वरिष्ठनेतारः उपस्थिताः भविष्यन्ति। अद्य मुम्बईनगरे भारतीय-जनता-पार्टीति दलस्य प्रमुखसमित्याः उपवेशने सः केन्द्रीयवित्तमन्त्रिणः निर्मलासीतारामण इत्यस्याः, गुजरातस्य पूर्वमुख्यमन्त्रिणः विजयरूपाणी इत्यस्य च उपस्थितौ विधायिकादलस्य नेता चितः।

विधायक: चन्द्रकान्तपाटिलः सुधीर-मुन-गन्ति-वारः च श्रीफडणवीसस्य नामं प्रस्तावितवन्तौ, यस्य समर्थनं सर्वैः नवनिर्वाचितैः विधायकैः कृतम् ।

------------------------------------------

भारत-वैश्विकदक्षिणः

भारतेन विकासशीलराष्ट्रानाम् उत्तम सहयोगार्थं वैश्विकवित्तीय-व्यवस्थायां परिवर्तनस्य आह्वानं कृतम्, अन्ताराष्ट्रीय-वित्तीय-संस्थासु वैश्विकदक्षिणस्य अधिकं प्रतिनिधित्वं बहुपक्षीय-विकास-बैङ्क इत्येतेषां (MDBs) वित्तपोषणं वर्धयितुं च बलं दत्तम्। संयुक्तराष्ट्रसङ्घस्य उपवेशने प्रवदन्ती वित्तमन्त्रालयस्य आर्थिक-कार्य-विभागस्य परामर्शदा भारतस्य सुश्री गीतुजोशी विकासशील-देशानां आवश्यकता: प्रति अधिकं प्रतिक्रियाशीलस्य वित्तीय-व्यवस्थायाः आवश्यकतायाः उपरि बलं दत्तवती। श्रीजोशी भारतस्य मानव-केन्द्रित-विकास-प्रतिरूपं वैश्विक-दक्षिणस्य उदाहरण-रूपेण प्रकाशितं यत् पञ्चविंशतिः कोटिजनाः निर्धन-रेखात: बहिः उत्थापिताः।

------------------------------------------

अमृतसर - एफडी सीएम बादलः

अमृतसरे स्वर्णमन्दिरस्य प्रवेशद्वारे पञ्जाब-राज्यस्य पूर्व-उप-मुख्यमंत्रिण: सुखबीरसिंह बादलस्योपरि हत्यायाः प्रयासः अद्य अभवत्, यस्मिन् सः अक्षतः एव अस्ति । श्रीबादलः श्री अकाल-तख्त-द्वारा दत्तां सेवां सेवमानः आसीत्। अद्य यदा प्रहारस्य प्रयासः जातः तदा सः प्रवेशद्वारे व्हीलचेयर इति चक्रचालिकायां स्थितः आसीत्। नारायणसिंहः इति नाम्नः जनः एव तं भुशुण्डीं प्रहारं कर्तुं प्रयतितवान् सः SGPC इति सेवादारैः सुरक्षाकर्मचारिभिः च अधिगृहीतः। प्रहारे गुलिका द्वारस्य भित्तिं आहतवान्। इदानीं अमृतसर-आरक्षी आयुक्तेन गुरप्रीतसिंह-भुल्लर् इत्यनेन उक्तं यत् श्रीबादल वर्यस्य हत्यायाः प्रयासः आततायिना नारायणसिंहेन कृतः, सः च गृहीतः अस्ति। पूर्वसांसदः श्रीमती हरसिमरत कौर बादलः, श्रीबादलस्य धर्मपत्नी च स्वर्णमन्दिरं संप्राप्तवन्तौ।

------------------------------------------

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

------------------------------------------

पीएम-नौसेनादिवसः-

प्रधानमन्त्री नरेन्द्रमोदी नौसेनादिवसस्य अवसरे भारतीय-नौसैन्य-कर्मिभ्यः अभिवादनं कृतवान्। एकस्मिन् सामाजिकान्तर्जालीय -संदेशे श्रीमोदी उल्लिखितवान् यत् नौसेनायाः वीरकर्मचारिणः अदम्य-साहसेन समर्पणेन च देशस्य समुद्राणां रक्षणं कुर्वन्ति इति । सः अवदत् यत् तेषां प्रतिबद्धता राष्ट्रस्य सुरक्षां, संरक्षां, समृद्धिं च सुनिश्चितं करोति। ततः परं श्रीमोदी अवदत् यत् भारतीयाः नौसेनायाः समृद्धे समुद्रीय-इतिहासस्य विषये महत् गर्वम् अनुभवन्ति।

------------------------------------------

नौसेना- राजनाथ :

रक्षामन्त्री राजनाथसिंहः नौसेना दिवसस्य अवसरे भारतीय नौसेनायाः सैनिकेभ्यः परिवारेभ्यः च शुभकामनाः प्रदत्तवान्। एकस्मिन् सामाजिकपटलीय संदेशे श्री सिंह : अवदत् यत् भारतीयनौसेना राष्ट्रियसुरक्षा-वास्तुकलायां भारतस्य समुद्रीयसुरक्षायाः रक्षणे च महत्त्वपूर्णः स्तम्भः अस्ति। सः अवदत् यत् हिन्दमहासागरक्षेत्रे प्राधान्यसुरक्षासहभागी प्रथमप्रतिवादी च इति भारतस्य पदाक्षेपः पुनः पुष्टयन् सुरक्षिताः, स्थिराः च समुद्राः सुनिश्चित्य नौसेना महत्त्वपूर्णां भूमिकां निर्वहन्ति।

------------------------------------------

लोकसभा सिन्धिया

संचारमन्त्रीणा ज्योतिरादित्य सिंधिया इत्यनेन उक्तं यत् नवदशाधिक द्विसहस्र तमे वर्षे BSNL इत्यस्मै सर्वकारेण विस्तारितेन पुनरुत्थान संग्रहनेन दूरसंचारउद्यमम् हानिकारकसंस्थातः लाभप्रदसंस्थायां परिणतम्। अद्य लोकसभायां पूरकपत्राणां उत्तरं दत्त्वा श्रीसिन्धिया: अवदत्

यत् प्रधानमन्त्रीण: नरेन्द्रमोदिनः नेतृत्वे बीएसएनएलइत्यस्या पञ्चाशत् सहस्राधिकं कर्मचारिणां पालनं सर्वकारस्य दायित्वम् अस्ति।

-----------------------------------------

इसरो/प्रोबा-3

भारतीयान्तरिक्षानुसन्धान-संघटनम् प्राप्त विसङ्गते: कारणात् श्व: अपराह्ने द्वादश-निमेषाधिक-चतुर्वादने श्रीहरिकोटाया: सतीश-धवनान्तरिक्ष-केन्द्रात् पी.एस्.एल्.वी.सी.-59-प्रोबा-3 इत्येतस्य प्रक्षेपणं पुनर्निर्धारितं। यूरोपीयान्तरिक्ष-संस्थाया: प्रोबा-3- प्रक्षेपणोपक्रम: भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य न्यू-स्पेस्-इण्डिया-लिमिटेड्-इत्येतस्या: वाणिज्यिक-शाखाया: सहयोगेन भवति।

-----------------------------------------

शिवराज - ग्रामीणः

केन्द्रीय ग्रामीण विकासमंत्रीणा शिवराजसिंह चौहानेन उक्तं यत् प्रत्येकस्य निर्धनस्य कृते सुदृढगृहं प्रदातुं सर्वकारेण पञ्चनवत्यधिक द्विकोटिम् यावत् गृहाणि अनुमोदितानि। अद्य नव दिल्ल्यां वार्ताहर सम्मेलनं सम्बोधयन् सः अवदत् यत् आगामिषु पञ्चवर्षेषु द्वि कोटितोप्यधिकानि गृहाणि निर्मीयन्ते। सः अवदत् यत् प्रधानमन्त्री आवासयोजना-ग्रामीण इत्यस्या: योजनाया: अन्तर्गतं अष्टत्रिंशल्लक्षं यावत् गृहाणि आवंटितानि सन्ति येषां कृते षड्शतोत्तर दशसहस्र कोटिरूप्यकाणां मूल्यानां अनुमोदनं जातम् अस्ति।

-----------------------------------------

राज्यसभा-जयशंकरः

विदेशमन्त्री डॉ. एस.जयशंकरः भारत-चीन देशयोः सुदृढसम्बन्धान् प्रवर्धनाय आधाररूपेण सीमक्षेत्रेषु शान्ति-स्थिरतायाः महत्त्वपूर्णं महत्त्वं बोधितवान्। अद्य राज्यसभायां चीनदेशेन सह भारतस्य सम्बन्धेषु घटनाक्रमेषु प्रवदन् डॉ. जयशङ्करः अवदत् यत् आगामिदिनेषु द्वयोः देशयोः मध्ये चर्चा ,समाह्वानान् न्युनिकरणे, प्रभावी सीमप्रबन्धने च केन्द्रीभूता भविष्यति।

-----------------------------------------

अण्डर-१९ एशिया कप क्रिकेट :

अद्य अण्डर-१९ इत्येतस्यां एशिया चषक-क्रीडायां भारतेन शारजाह्-क्रिकेट्-क्रीडाङ्गणे संयुक्त-अरब-अमीरातस्य अ-समूहस्य एकदिवसीय-अंताराष्ट्रीय-क्रिकेट्-क्रीडायां दश स्तोभैः पराजितम्। यूएई- इति दलेन पणकं विजित्य प्रथमं क्रीडयन्त्या अष्टत्रिंशोत्तर एक शतं धावनांकानां लक्ष्यं प्रदत्तम् आसीत्।

-------------------------------------------

हॉकी-जूनियर एशिया कप :

हॉकीति-क्रीडायां अद्य सायं ओमान-देशस्य मस्कट्-नगरे पुरुषाणां-कनिष्ठ-हॉकी-एशिया-चषक-क्रीडायाः अन्तिम-क्रीडायां भारतीय-दलं पाकिस्तान दलं सम्मुखी करिष्यति। स्पर्धायाः प्रसारणं सायं सार्द्ध अष्ट वादने भविष्यति। प्रतियोगितायां अपराजितम् विगत विजेता भारतं अस्यां स्पर्धायां पञ्चमं वारं तथाच क्रमशः तृतीयवारं विजयं प्राप्तुं सज्जमस्ति।

।।इति वार्ता:।।